# ॥ श्री नृसिंहाष्टकम् ॥

श्रीमदकलङ्क परिपूर्ण शशिकोटि-
श्रीधर मनोहर सटापटल कान्त ।
पालय कृपालय भवाम्बुधि-निमग्नं
दैत्यवरकाल नरसिंह नरसिंह! ॥ १ ॥

पादकमलावनत पातकि-जनानां
पातकदवानलपतत्रिवर-केतो ।
भावन परायण भवार्ति-हरया मां
पाहि कृपयैव नरसिंह नरसिंह! ॥ २ ॥

तुङ्गनख-पङ्क्ति-दलितासुर-वरासृक्
पङ्क-नवकुङ्कुम-विपङ्किल-महोरः ।
पण्डितनिधान कमलालय नमस्ते
पङ्कजनिषण्ण नरसिंह नरसिंह! ॥ ३ ॥

मौलिषु विभूषणमिवामर वराणां
योगिहृदयेषु च शिरस्सु निगमानाम् ।
राज-दरविन्द-रुचिरं पदयुगं ते
देहि मम मूर्ध्नि नरसिंह नरसिंह! ॥ ४ ॥

वारिजविलोचन मदन्तिम-दशायां
क्लेश-विवशीकृत-समस्त-करणायाम् ।
एहि रमया सह शरण्य! विहगानां
नाथमधिरुह्य नरसिंह नरसिंह! ॥ ५ ॥

हाटक-किरीट-वरहार-वनमाला
धाररशना-मकरकुण्डल-मणीन्द्रैः ।
भूषित-मशेष-निलयं तव वपुर्मे
चेतसि चकास्तु नरसिंह नरसिंह! ॥ ६ ॥

इन्दु रवि पावक विलोचन रमायाः
मन्दिर महाभुज-लसद्वर-रथाङ्ग! ।
सुन्दर चिराय रमतां त्वयि मनो मे
नन्दित सुरेश नरसिंह नरसिंह! ॥ ७ ॥

माधव मुकुन्द मधुसूदन मुरारे
वामन नृसिंह शरणं भव नतानाम् ।
कामद घृणिन् निखिलकारण नयेयं
कालममरेश नरसिंह नरसिंह! ॥ ८ ॥

अष्टकमिदं सकल-पातक-भयघ्नं
कामद-मशेष-दुरितामय-रिपुघ्नं ।
यः पठति सन्तत-मशेष-निलयं ते
गच्छति पदं स नरसिंह नरसिंह! ॥ ९ ॥